कलां कलां गृहीत्वा वै देवानां विश्वकर्म्मणा ।
निर्म्मितोऽयं सुरैर्यस्मात् कलसस्तेन उच्यते ॥
कलसस्य मुखे ब्रह्मा ग्रीवायान्तु महेश्वरः ।
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः ॥
शेषास्तु देवताः सर्व्वा वेष्टयन्ति चतुर्द्दिशम् ।
कुक्षौ तु सागराः सप्त सप्त द्वीपास्तु संश्रिताः ॥
नक्षत्राणि ग्रहाः सर्व्वे तथैव कुलपर्व्वताः ।
हिमवान् हेमकूटश्च निषधो मेरुरेव च ॥
रोहितो माल्यवन्तश्च सूर्य्यकान्तिश्च पर्व्वताः ।
गङ्गा सरस्वती सिन्धुः सुभगा यमुना नदी ॥
ऐरावती शतद्रुा तथा वैतरणी नदी ।
गोदावरी नर्म्मदा च मही नाम महानदी ॥
कुरुक्षेत्रं प्रयागश्च एकहंसं पृथूदकम् ।
अमरेश्वरः पुण्डरीकं गङ्गासागर एव च ॥
पृथिव्यां यानि तीर्थानि कलसे निवसन्ति ते ।
ग्रहाः शान्तिश्च पुष्टिश्च प्रीतिर्गायत्रिरेव च ॥
ऋग्वेदोऽथ यजुर्व्वेदः सामवेदस्तथैव च ।
अथर्व्ववेदसहिताः सर्व्वे कलससंस्थिताः ॥
नवैव कलसाः पुण्याः शम्भुमूर्त्तिसमुद्भवाः ।
गोभ्योपगोभ्यो मरुतः स्वस्वदश्च तथा परः ॥
मनोहरः खलुभंद्रः पञ्चमः परिकीर्त्तितः ।
विरजस्तस्तुदूषश्च षष्ठसप्तमकावुभौ ॥
अष्टमस्त्विन्द्रियोपेतो नवमो विजयः स्मृतः ।
नवैव कलसाः ख्याता अधिदेवं निबोधत ॥
शृणु वत्स ! यथा तेषां दिशां न्यासो व्यवस्थितः ।
नवमो यः समाख्यातो विजयो नाम नामतः ॥
शिवस्तत्र स्थितः साक्षात् सर्व्वपापहरः शुभः ।
क्षितीशो ज्येष्ठकलसो द्वितीयो जलसम्भवः ॥
तृतीयः पवनस्यैव चतुर्थस्तु हुताशनः ।
पञ्चमो यजमानस्तु षष्ठस्त्वाकाशसम्भवः ॥
सोमस्तु सप्तमः प्रोक्त आदित्यश्च तथाष्टमः ।
एते चोत्पादिता देवा शिवेनाधिष्ठिताः पुरा ॥
इन्द्रस्य मूर्त्तयश्चाष्टौ सूर्य्यान्ता नवमः शिवः ।
क्षितीश्वरः पूर्व्वतो न्यास्यः पश्चिमे जलसम्भवः ॥
वायव्ये वायवो न्यास्य आग्नेये अग्निसम्भवः ।
नैरृते यजमानस्तु ऐशान्याकाशसम्भवः ॥
सौम्यमुत्तरतो योज्यं सौरं दक्षिणतो न्यसेत् ।
न्यस्यैवं कलसानान्तु पूर्व्वरूपं विचिन्तयेत् ॥
कलसानां मुखे ब्रह्मा ग्रीवायां विष्णुरेव हि ।
मध्ये मातृगणाः सर्व्वे सेन्द्रा देवाश्च पन्नगाः ॥
कुक्षौ तु सागरास्तेषां सप्तद्वीपा च मेदिनी ।
श्रिया चैव तथोमा च गन्धर्व्वा ऋषयस्तथा ॥
पञ्चभूतास्तथा धारास्तेषामवस्थिताः स्थिताः ।
पूर्णाः पूतेन तोयेन शिवाम्बुकान्ततो मुने ! ॥
सरित्सरःखातेन तड़ागेन जलेन वा ।
वापीकूपोद्भिदेनैव सामुद्रेण सुखावहाः ॥
सर्व्वमङ्गलमाङ्गल्याः सर्व्वकिल्बिषनाशकाः ।
अभिषेके सदा ग्राह्याः कलसा ईदृशाः शुभाः ॥
यात्राविवाहकाले वा प्रतिष्ठायज्ञकर्म्मणि ।
योजनीया दिशीशेषु सर्व्वकामप्रसाधकाः ॥
ग्रहान् धारयते यस्मात्तरा विविधास्तथा ।
दुरितांश्च महाघोरांस्तेन ते धारकाः स्मृताः ॥
एकैकान्तु कलां मूर्त्तौ क्षित्यादीनां यथाक्रमम् ।
संहृत्य संस्थिता यस्मात्तेन ते कलसाः स्मृताः ॥
हेमराजतताम्रा वा मृण्मया लक्षणान्विताः ।
पञ्चमाङ्गुलवैपुल्यमुत्सेधः षोड़शाङ्गुलः ॥
कलसानां प्रमाणन्तु मुखमष्टाङ्गुलं भवेत् ॥”
इति देवीपुराणम् ॥
धारणकर्त्तरि, त्रि ॥ (यथा, पञ्चतन्त्रे ।२।१७५।
“अप्रियाण्यपि पथ्यानि ये वदन्ति नृणामिह ।
त एव सुहृदः प्रोक्ता अन्ये स्युर्नामधारकाः ॥”)

धारणं, क्ली, (धृ+णिच्+भावे ल्युट् ।) विधारणम् । इति मेदिनी । णे, ५६ ॥ धरण इति भाषा ॥ (यथा, सुश्रुते । १ । ४६ ।
“तैलस्याथ निहरेदास्तु कफं गण्डूषधारणात् ॥”
पुं, कश्यपपुत्त्रो नागविशेषः । यथा, महाभारते । ५ । १०३ । १६ ।
“विरजा धारणश्चैव सुबाहुर्मुखरो जयः ॥”
धारयतीति । धृ+णिच्+ल्युः । धारके, त्रि । यथा, महाभारते । १२ । ३३५ । ५४ ।
“अभ्युर्थयेक्षितं देवं तपसे कृतनिश्चयाः ।
धारणाः सर्व्वलोकानां सर्व्वधर्म्मप्रवर्त्तकाः ॥”)

धारणा, स्त्री, (धार्य्यते या सा । धृ+णिच्+युच् । टाप् ।) बुद्धिः । इति राजनिर्घण्टः ॥ (यथा, याज्ञवल्क्ये । ३ । ७३ ।
“इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः ।
धारणा प्रेरणं दुःखमिच्छाहङ्कार एव च ॥”)
न्याय्यपथस्थितिः । तत्पर्य्यायः । संस्था २ मर्य्यादा ३ स्थितिः ४ । इत्यमरः । २।८।२६ ॥ (यथा, मनुः । ४ । ३८ ।
“न लङ्घयेत् वत्सतन्त्रीं न प्रधावेच्च वर्षति ।
न चोदके निरीक्षेत स्वं रूपमिति धारणा ॥”)
योगाङ्गविशेषः । इति मेदिनी । णे, ५६ ॥
“स तु अद्वितीयवस्तुन्यन्तरेन्द्रियधारणम् ।” इति वेदान्तसारः ॥ ध्येये चित्तस्य स्थिरबन्धनम् । इति हेमचन्द्रः ॥
“तस्मात् समस्तशक्तीनामाधारे तत्र चेतसः ।
कुर्व्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥”
इति विष्णुपुराणे । ६ । ७ । ७४ ॥
ब्रह्मणि मनोधारणम् । यथा,—
“ब्रह्मात्मचिन्ता ध्यानं स्यात् धारणा मनसो धृतिः ।
अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः ॥”
इति गारुड़े ४९ अध्यायः ॥
अष्टादशप्राणायामादिरूपधारणा यथा,—
“प्राणायामा दशाष्टौ च धारणा साभिधीयते ।
द्वे धारणे स्मृतो योगो मुनिभिस्तत्त्वदर्शिभिः ॥
प्राङ्नाभ्यां हृदये चात्र तृतीया च तथोरसि ।
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ।
किञ्चित्तस्मात् परस्मिंश्च धारणाः परमाः स्मृताः ।
दशैता धारणाः प्राप्य प्राप्नोत्यक्षरसाम्यताम् ॥”
इति गारुड़े २३० अध्यायः ॥
अपि च ।
“प्राणायामैर्द्वादशभिर्यावत्कालो कृतो भवेत् ।
यस्तावत्कालपर्य्यन्तं मनो ब्रह्मणि धारयेत् ।
तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादशधारणाः ॥
द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः ।
तुष्टे तु स यतो युक्तः समाधिः सोऽभिधीयते ॥
ध्येयान्न चलते यस्य मनोऽभिध्यायतो भृशम् ।
प्राप्यावधि कृतं कालं यावत् सा धारणा स्मृता ॥”
इति च गारुड़े २४० अध्यायः ॥

धारणी, स्त्री, (धार्य्यते शरीरमनया । धृ+णिच्+ल्युट् । स्त्रियां ङीप् ।) नाड़िका । बुद्धोक्तमन्त्रभेदः । इति मेदिनी । णे, ५५ ॥ श्रेणी । इति हेमचन्द्रः ॥

धारणीया, स्त्री, (धार्य्यतेऽसाविति । धृ+णिच्+अनीयर् ।) धरणीकन्दः । इति राजनिर्घण्टः ॥ धार्य्ये, त्रि ॥

धारयित्री, स्त्री, (धारयति सर्व्वमिति । धृ+णिच्+तृच् । स्त्रियां ङीप् ।) पृथिवी । इति शब्दरत्नावली ॥ (धारके, त्रि । यथा, महाभारते । ५ । ६५ । ८ ।
“त्वं हि धारयिता श्रेष्ठः कुरूणां कुरुसत्तम ! ॥”)

धारा, स्त्री, (धार्य्यन्ते अश्वा यया । धृ+णिच्+अङ् । स्त्रियां टाप् ।) अश्वानां पञ्चधागतिः । तद्यथा । आस्कन्दितम् १ धौरितकम् २ रेचितम् ३ वल्गितम् ४ प्लुतम् ५ । इत्यमरः ।२ । ८ । ४९ ॥ (यथा, माघे । ५ । ६० ।
“अव्याकुलं प्रकृतमुत्तरधेयकर्म्म
धाराः प्रसाधयितुमव्यतिकीर्णरूपाः ।
सिद्धं मुखे नवसु वीथिषु कश्चिदश्वं
वल्गाविभागकुशलो गमयाम्बभूव ॥”
“अव्यतिकीर्णरूपा असंकीर्णरूपा धारा गतिभेदाः ।
‘अश्वानान्तु गतिर्धारा विभिन्ना सा च पञ्चधा ।
आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ॥’
इति वैजयन्ती ॥
‘जातयोऽश्वः पञ्च धाराः ।’ इत्यमरश्च ॥ अश्वशास्त्रे तु संज्ञान्तरेणोक्ताः ।
‘गतिः पुला चतुष्का च तद्वन्मध्यजवा परा ।
पूर्णवेगा तथा चान्या पञ्च धाराः प्रकीर्त्तिताः ॥
एकैका त्रिविधा धारा हयशिक्षाविधौ मता ।
लघ्वी मध्या तथा दीर्घा शास्त्रेता योजयेत् क्रमात् ॥’
तथा च पञ्चदशविभेदा भवन्ति । ताः पञ्च धाराः प्रसाधयितुं परिचेतुं नवसु वीथिषु सञ्चारस्थानेषु गमयाम्बभूव ॥” इति तट्टीकायां मल्लिनाथः ॥) सैन्याग्रिमस्कन्धः । घटादिच्छिद्रम् । सन्ततिः । (यथा, महाभारते । ६ । ११८ । २४ ।
“उत्पपात ततो धारा वारिणो विमला शुभा ॥”)
द्रवस्य प्रपातः । (यथा, महाभारते ।१।२२४।५९।
“त्वया द्वादश वर्षाणि वसोर्द्धाराहुतं हविः ।
उपयुक्तं महाभाग ! तेन त्वां ग्लानिराविशत् ॥”)
खड्गादेर्न्निशितमुखम् । इति मेदिनी । रे, ५० ॥